This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथरसरत्नाहारव्याख्याप्रारंभः॥छ॥

Acc. No. ~~7161~~ M-1874

Title - रसरत्नहार व्याख्या।

Author - टी० :- शिवराम त्रिपाठिन्

Date - ?

Sub - ?

folio - 11

Xerox - 21

KKSU LIBRARY
RAMTEK
441 106
M-1874
Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० भा०
१

॥श्रीगणेशाय नमः॥श्रीगुरुचरणाभ्यां नमः॥ दधार यः कुवलयं दंते कुवलयं यथा॥ स रदानुश्रि
यं नित्यं विलुर्वाराहरूपधृक्॥१॥ नत्वा गिरं गुरुं स्मृत्वा शिवरामः करोम्यहं॥ रसादिरत्नहारस्य व्या
ख्यां चिंतामणेर्मुदे॥२॥ आलंबनेति॥ आलंबनं च उद्दीपनं च आलंबनोद्दीपने ताभ्यां भिन्नौ भेद
वानू आलंबनविभावः उद्दीपनविभाव इति भेदद्वयवान्॥ रसस्य नवरसस्य हेतुः सुधीभिः क
थितः॥ अयं आलंबं आश्रित्य रसः शृंगारादिः प्रवृत्तः भवेत् स आलंबनाख्यः विभावः भवेत्॥
३॥ यथा नायिकादिः॥४॥ तटस्थेति॥ तटस्थः वर्ण्यमानरसानाश्रयः रसं वर्ण्यमानं उद्दीपयते प्रकर्षं
प्रापयति॥ सः उद्दीपनाख्यः विभावः यथा स्रक्चंदनादिः॥ रसस्य वर्णमानरसस्य कार्यं अनुभाव
संज्ञं अनुभावाभिधानं॥ अत्र व्यभिचारिणो निर्वेदादयः पोषकाः॥५॥ शृंगारेति॥ काव्येन तु नाटके
॥६॥ स्त्रीपुंसेति॥ अचतुरेति निपातनात्स्त्रीपुंसयोरिति साधुः॥ मिथः परस्परं रागवृद्धिः अनु रा

शिव
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गातिशायः शृंगारः उच्यते ॥ एषः द्वयोः संभोगः विप्रलंभश्चेति द्विविधः स्यात् ॥ ७ ॥ संयुक्तेति ॥ सं
युक्तयोः द्वयोः वर्ण्यमानः रसः शृंगारः वियुक्तयोः विप्रलंबः एषः द्विविधः प्रछन्नः प्रकाशश्च द्विधा
मतः द्विप्रकारकः ॥ ८ ॥ स्त्रीपुंसाविति ॥ स्त्रीपुंसाविति निर्देशात् पुरा पूर्वं नायिका वर्ण्यते ॥ स्वीया
पाणिगृहीता ॥ परकीया पराधीना ॥ सामान्या सर्वसाधारणा ॥ त्रिधा त्रिप्रकाराः स्त्रियः ॥ ९ ॥ स्व
कीयेति ॥ स्वकीया उत्तमाचारा पातिव्रत्यधर्मविशिष्टा ॥ पतिमात्रानुरागिणी यस्या एवं इति पतिमा
त्रं तादृक् अनुरागो यस्याः ॥ मुग्धा मध्या प्रगल्भेति त्रिधा इति भेदात् त्रिविधा ॥ तासु पूर्वोक्तासु त्रिषु
आद्या अंकुरितयौवना मुग्धा सा मुग्धा द्विविधा अज्ञातयौवना च सैव मुग्धैव सुरतप्रतिरोधकत्व
ज्ञेया नवोढासंज्ञका ॥ ११ ॥ स्यादिति ॥ मनाक् ईषत् मंदाक्षमाद्यतः लज्जा हासात् मंदाक्षं ह्रीस्त्रपा
व्रीडेत्यमरः ॥ विश्रब्धनवोढा स्यात् क्रीकामसाम्ये मध्या स्यात् ॥ जलज्जामदनयोः साम्ये मध्या स्यात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० व्या०
२

नायके सागसि सति अन्यवनितादर्शनाद्यपराधवति सति धैर्ये धीरतायां सत्यां वक्रोक्तिः नद्वैपरी
त्ये अधीरतायां रुषा परुषवाक् परुषा कठिना वाक् यस्याः तादृशी भवेत् प्रौढा ह्यधिककंदर्पाद्धि यः
अधिकः कंदर्पो यस्याः पसौ अखिलकेलिकृत् ॥ केलिं क्रीडां करोतीति केलिकृत् ॥१३॥ एता इति ॥
एताः पूर्वोक्ताः मुग्धादयः ज्येष्ठा कनिष्ठेति द्वेधा या भर्तुः स्नेहैकभाजनं भवेत् ॥ मुख्यप्रीतिपात्रं
भवेत् ॥ सा ज्येष्ठा ॥ ततः अवरा न्यूना कनिष्ठा ॥१४॥ धीराधीरेति ॥ धीरा अधीरा धीराधीरा इति
यो मध्याप्रगल्भिके स्त्रियो मानावस्थायां बुधैस्त्रिविधे उदिते ॥१५॥ धीराधीरा क्रमादिति ॥ क्रमा
त् अंग्या अंग्यकोपप्रकाशिके धीराधीरे ज्ञेये ॥ अंग्यकोपप्रकाशिका धीरा ॥ अव्यंगकोपप्रका
शिका अधीरा ॥ व्यंगाव्यंगकोपप्रकाशिका धीराधीरा ॥१६॥ प्रियं सेति ॥ मध्या धीरा प्रियं सोत्प्रा
सवक्रोक्त्या रुषा क्रोधेन दहेत् संतापयेत् ॥ अधीरा परुषोक्त्या कठोरवाक्येन ॥ धीराधीरा तु रो

शिव
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दनैः धवं खेदयेत् ॥१७॥ प्रगल्भेति ॥ प्रगल्भा प्रौढा यदि धीरा स्यात् ॥ छन्नकोपाकृतिः छन्ना कोप
स्य आकृतिर्यया सा छन्नकोपाकृतिः ॥ तत्र मानावस्थायां सुरते उदास्ते उदासीना भवति ॥ वहिः आ
दरान्दर्शयति ॥१८॥ धीराधीरेति ॥ अथ प्रौढा धीराधीरा सोल्लुंठभाषितैः ईषत्स्मतु स्मितवचनैः
धवं खेदयेत् ॥ अन्या अधीरा ॥ तर्जयेन् भर्त्सयेत् ॥ भर्त्सनं त्वपकारगीरित्यमरः ॥ ताडयेत् ॥ इति
साहित्यदर्पणे उक्तं ॥१९॥ धीराधीति ॥ प्राचीनलेखनं धीरादिभेदाः स्वीयायाः इति ॥ नव्यैस्तु पर
कीयायाः अपि ते धीरादिभेदाः परकीयायां अपि स्युः ॥ तत्रापि मानसंभवादिति भावः ॥२०॥ स्वा
नूढेति ॥ स्वेन अनूढा अपरिणीता स्वस्मिन् अनुरक्ता ॥ अन्ये त अनूढोढावेत्यत्र नाग्रहः एवं च
कन्यकाया अपि संग्रहः ॥ परकीया निगद्यते कथ्यते ॥ स्वसन्तापरित्यागात् पूर्वे सा स्वपितुः तदुत्तरं
भर्तुः ॥ सा परकीया उत्तमाधमभेदाभ्यां द्विविधा द्विप्रकारा द्विविधा परोढा कन्यका भेदान् मतासे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० व्या०
३

मता॥२१॥अलक्षितेति॥एषापरकीयाअलक्षितानुरागानलक्षितःअनुरागोयस्याःसाता
दृशी॥अतएवस्वीयाकल्यासदृशीउक्तमात्रेष्टाभवेत्॥तद्भिन्नाकिंचिल्लक्षितानुरागाअवमाअ
धमाज्ञेयासर्वथाव्यक्तानुरागातुलक्षितैवभवेत्॥विदग्धाद्याख्यातद्भिन्नातस्याःभेदांज्ञेयाः
॥२२॥परोढेति॥परेणऊढापरोढाकन्यकाअपरिणीताएवाद्विविधापरांगनाअस्याःएषाचेष्टा
कविभिःअस्याःअनुरागःप्रसिद्धःनस्तुतःनवर्णितः॥२३॥विदग्धेति॥एषापरकीयाषट्प्रका
राबुधैःउक्ता॥२४॥विदग्धेति॥वाक्क्रियाहेतुवैदग्ध्याभ्यांवचनक्रियाहेतुकचातुर्येणविदग्धा
द्विधावाक्विदग्धाक्रियाविदग्धाद्रष्टव्यंतेदृष्टाभवति॥भाविस्थाभीष्टबोधेनभविष्यसंकेतस्था शिव
नेनप्रहृष्टामुदिताउच्यते॥२५॥नाशादिति॥संकेतस्थलस्यनाशात्भाविनःसंकेतस्थलस्य ३
अभावशंकया॥स्वहीनप्रिययातस्य॥स्वेनआत्मनाहीनंयतुसंकेतस्थानं॥तत्रप्रिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य पातं गनं ॥ तस्य बोधात् ज्ञानात् ॥ अनुशया ॥ अनुशयाना त्रिधा त्रिप्रकारा भवति ॥ २६ ॥ उ
क्षितेति ॥ याजनैः सखीनायकभिन्नैः ज्ञातरागिका ज्ञातः रागः प्रिति यस्याः सा ज्ञातरागिकासा
तु उक्षिता ज्ञेया ॥ याभूतं भविभवत् वर्जमान इव अन्नूनवेश्यान्नूनत्वं च धनग्रहणाभावेन तत्स
त्वे तु वेश्यैव रतं सुरतं गोपायति आच्छादयति सा गुप्ता ॥ २७ ॥ कुलटेति ॥ वेश्यादेश्याप्रकाशातः व
हु पुंरागा कुलटा ज्ञेया ॥ लोभेन द्रव्यलोभेन सर्वपुंरागा सामान्या सर्वसाधारणभूता बुधैः कथि
ता ॥ २८ ॥ गर्वितेति ॥ स्त्रियः पूर्ववर्णिताः यथासंभवं गर्विता अन्यसंभोगदुखिता मानिनी इ
ति त्रिविधा भवंति ॥ प्रेमसौंदर्ययोः हेत्वोः भिदा भेदेन गर्विता द्विधा ॥ प्रेमगर्विता सौंदर्यगर्विता
च ॥ २९ ॥ विदिति ॥ सो कुमार्यादिगर्विताः अन्यापि द्वयं छंति ॥ पस्या भुक्तो अन्यां रात्र्य नस्ता दुखि
ता अन्यसंभोगदुःखिता ॥ पस्येऽस्य्येस्यत्रओमाङोश्चेति पररूपं ॥ ३० ॥ मानेति ॥ मानः कोपं पं: स

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० मा०
४

नु द्वेधा द्विप्रकारेण ॥ प्रणये ईर्ष्योत्थभेदतः प्रीती ईर्ष्याभेदाभ्यां द्वेधा प्रणयमानः कोपमानः ॥ यः
कारणं विना कोपः सः प्रणयमानः ॥ उभयोरपि स्यादिति ॥ नायिकया वल्लभः प्रीत्या श्रयस्य अन्यप्रियासं
गे अन्या यात दृष्टप्रियायाः संगे दृष्टे अनुमिते श्रुते सति स्त्रीणां ईर्ष्यामानः भवेत् ॥ तत्र त्रिधा त्रिप्र
कारेण अनुमितिः अनुमानं ॥ ३ ॥ तदिति ॥ स्वप्नायितं स्वप्नभाषितं ॥ भोगांकः नखक्षतादिः गोत्र
स्खलनं भ्रमेण अन्यनायिकानामोच्चारणं ॥ एतैः भवेत् ॥ अथ सामभेदाः दानं नति उपेक्षा रसां
तरं इति तद्भंगाय पतिः इमान् षडुपायान् क्रमात् कुर्यात् ॥ तत्र षडुपाये षु प्रियवचः प्रियवचनं
साम सखीनां उपरंजनं भेदः ॥ भूषादेः व्याजेन दानं तद्दानं ॥ पादयोः पतनं नतिः ॥ सामादौ परि
क्षीणे सति अवधीरणं तिरस्कारः उपेक्षा स्यात् ॥ रभसत्रास हर्षादेः रभसः त्वरा त्रासः भयं ॥
हर्षादिः कोपभ्रंशः रसांतरं भवति ॥ इति अनेन प्रकारेण मानविचारः साहित्यदर्पणे कृतः ॥ ३ ॥

शिव
४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानेति॥लघुमध्यमः गुरुः मानः त्रिधा भवेत्॥असाध्यः मानस्तु रसाभासः इति भानुकृतौर
सर्मंजर्यां स्थितं॥३६॥अपरे॥अपरस्त्रीदर्शनोत्थः मानः लघुः॥गोत्रस्खलनजः मानः मध्य
मः अन्यस्त्रीसंगजनितः मानः गुरुः॥इति क्रमेण त्रिविधः भवेत्॥३७॥विशेषेति॥नायिका
नां स्वाधीनपतिकादयः विशेषास्तु अन्यत्र ग्रंथांतरे पूर्वापर्येण उक्ते मनीषिभिः हेतुः कृत्यः
॥३८॥स्वाधीनेति॥यस्याः पतिः स्वाधीनः सा स्वाधीनपतिका॥सुरतोचितवारज्ञा वारः पर्या
यः॥या सुरतोपयोगिनी सामग्रीं संपादयति सा वासकसज्जा॥या भर्तुः अनागमनकारणं ध्या
यति सा उत्का॥४०॥रतार्थिनीति॥रतार्थिनी संकेतं या याति सा अभिसारिका॥तत्र संकेतस्थले
प्रियं अदृष्ट्वा संतापसंकुला विप्रलब्धा॥४१॥खंडितेति॥रतिचिह्नाद्यः नखक्षतादिचिह्नितः
यस्याः नायकः आयाति सा खंडिता॥या प्रियं अवमत्य अनादृत्य संतप्ता भवेत् सा कलहांतरिता॥४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० मा० ५

॥४२॥प्रवासिनीति॥प्रवासिनिप्रियेसतियातमासाप्रोषितभर्तृकाज्ञेया॥प्रवत्स्यतिप्रवासो
न्मुखेप्रियेसतितसाप्रवत्स्यत्पतिकाइष्यते॥४३॥कुर्वतेति॥अहितंकुर्वतोपिप्रत्युःयाहितकु
रु्सा उत्तमा॥प्रियवत् हिताहितंयाचरतिसामध्यमा॥४४॥कुर्वत्यपीति॥पत्योहितंकुर्वत्यपि
याअहिचरतिकुरुतेसाअधमा॥इतिअनेनप्रकारेणताःस्वभावप्रभवैःगुणैःस्वभावजातैःगु
णैःत्रिविधाज्ञेयाः॥४५॥विश्वासेति॥विश्वासपात्रंविश्वासस्यानं॥विश्रामकारिणीचेतसःस
माधानंसंपादयित्री॥पार्श्वचारिणीसमीपेवर्तमानासखीतस्याःसख्याःकर्मशिक्षोपालंभपूर्व
कंशिक्षातस्याःहितेप्रवर्तितं॥भूषासमयोचितभूषणधारणकारयितृत्वं॥उपालंभःनायकं
प्रतिएतद्विरसतासंपादकातदीयाचारकथनं॥४६॥परिहासेति॥दंपत्योःमिथःपरिहासः
॥तथासख्याकृतःदंपत्योःपरिहासः॥दूतव्यापारनिपुणादूतव्यापारःसंयोजनं॥निपुणा

शिव ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुरा॥ संयोगकारिणी दूती॥४७॥ विरहादेरिति॥ विरहादेर्ज्ञापिका च अतः परं नायकाः व
र्ण्यते॥ पतिः विधिवत् पाणिगृहीतादिः॥ उपपतिः शीलादिनाशीकर्त्ता॥ वैशिकः वेश्यायां
अनुरक्तः। क्रमात् त्रयः भवंति॥४८॥ वोढेति॥ वोढुः अन्यः स्त्रीणां रतेः आश्रयः उपपतिः॥
वेश्यासुरक्तः वैशिकः॥ यः स्त्रीणां रतेः आश्रयः॥४९॥ रक्तेति॥ रक्तायामनुरक्तः अनुकूलः॥ स
र्वासु समः दक्षिणः। स्पष्टापराधो विप्रियया निराकृतोपि अस्यां समासक्तः निर्लज्जः धृष्टः॥ स्त्रीक
पटः स्त्रीप्रतारणं तस्मिन् पटुः शठः शठसंज्ञकः॥ मनीषिभिः यथासंभवं भेदाः ऊह्याः॥५१॥ मा
नीति। मानी चतुरश्च उभौ शठभेदेषु प्रकीर्तितौ कथितौ मानी मण्यमानवान् अन्यश्चतुरः॥ रसमं
जर्यां॥ नमो जराळे हरीदंतराळेकाले निशायास्तव निर्गतायाः॥ तटेन दीनां निकटे वनीनां घटेत शी
तो दरिकः सहायः॥ वाकूचतुरस्य॥२॥ कांते कनकजं बीरं करे किमपि कुर्वति। आगारलिखि

KKSU LIBRARY
RAMTEK
441 106
M-1874
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते भानौर्विंदुर्मिंदुमुखी दद्दे ॥ चेष्टाचतुरस्य ॥२॥ वाचः चेष्टापाः पतूर्म्यं गम्यं तेन समागमस्वसमाग
मसूचनं तत्र निपुणः ॥५२॥ तेषामिति ॥ तेषां नायकानां नर्मसचिवः क्रीडासहायः पीठमर्दयः १
विटः २ चेटः ३ विदूषकः ४ इति चतुर्धा भानुना उदिताः ॥५३॥ पीठमर्देति ॥ पीठमर्दः मानिन्याः अनु
नयकर्त्ता ॥ विटः बंधोपधादिज्ञाता ॥ संधानं संयोगः ॥ तत्र दक्षिणः चतुरः ॥५४॥ अंगवागिति ॥ अं
गानि वा कूर्च वेषश्च तेषां पदैः कृत्यं पूर्वस्थितिविकारवत्त्वं तेन हास्यकारी विदूषकः ॥ आद्यानुरा
गः मानात्मा मानस्वरूपः प्रवासकरुणात्मकः ॥ अयं विप्रलंभः पूर्वपूर्वः गुरुश्रेष्ठः स्यात् ॥ पूर्वा
नुरागविप्रलंभः कादंबर्यां महाश्वेतावर्णने स्पष्टः ॥ कामवर्द्धितरागयोः दशा अपूर्णस्पृहयोः
दंपत्योः नवावलोकात् पूर्वानुरागो विज्ञेयः दशा दर्शने न न पूर्णा स्पृहा इच्छा ययोः ॥ मानप्रवासौ
उदितौ ॥ मानः मानिनीवर्णने । प्रवासः प्रोषितभर्तृकावर्णने एतौ पूर्वं उक्तौ ॥ तयोः दंपत्योः ए

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्यपंचत्वेएकस्य मरणे॥करुणः॥तत्रस्मिन्करुणरसे बुधैःतस्यभूतकर्मणः वर्णनं क्रियते॥
अथस्त्रीणां शास्त्रदर्शिताः अलंकाराः।वर्ण्यते॥५८॥यौवनेति॥तासांस्त्रीणां यौवनेसत्वजाः
अलंकाराः अष्टाविंशतिः ईरिताः उक्ताः॥तत्रअष्टाविंशत्यलंकारेषुभावहावंहेलाःत्रयःअं
गजाः शोभाकांतिश्चदीप्तिश्चमाधुर्यंप्रगल्भताच॥औदार्यं धैर्यमिति एतेसप्तैवअयत्नजाःस्युः
॥लीलाविलासः विछित्तिः विब्बोकः किलकिंचितं मोट्टायितं कुट्टमितं विभ्रमो लुलितंमदः॥विहृ
तं।तपनं।मौग्ध्यं।विक्षेपश्च॥कुतूहलं॥हसितं॥चकितंकेलि॥इतिअष्टादशसंज्ञकाःस्वभावजाः
स्युः॥अमीभावाद्याःदशापुंसांभवंति॥निर्विकल्पेचित्तेइष्टसंदर्शनादिनोयः आदिमः विकारःसः
भावः॥६३॥नेत्रादीति॥नेत्रादिविकारेणप्रकाशमानःरतीधिकःरतेःइच्छायस्मिन्तादृशः॥रती
च्छिकःभावःहावः॥अत्यंतसमालक्ष्यःहावएवहेलाक्रमात्इतिउदितः॥६४॥रूपेति॥रूपयौवन

13

र० व्या०
७

भोगाद्यैः अंगभूषणेशोभास्यात्॥ मन्मथोन्मेषणा कामप्रकाशवती सेव हेलैव विस्तीर्णकांतिः इत्यु
च्यते॥६५॥ कांतीति॥ अतिप्रकाशात्॥ कांतिरेव दीप्तिः इति अभिधीयते॥ सर्वावस्थाविशेषेण मधु
र्यं रमणीयता॥ रुरुदिशावदनांबुरुहश्रियः सुतनु सत्समलंकरणायते॥ तदपि संप्रतिसंन्निहिते
मधावधिगमं गलमश्रुणः॥ इति शिशुपालवधे॥६६॥ निःसाध्यमिति॥ प्रागल्भ्यं अन्यानभिभव
नीयस्वभावत्वं॥ निःसाध्यसत्वं॥ सदाविनयः औदार्यं॥ मुक्तासक्ता अत्मस्तुतिर्यत्र एतादृशी अ
चंचला मनोवृत्तिर्धैर्यं॥६७॥ अंगैरिति॥ प्रतिप्रयोजितैः कृतैः एतैः कलाप्रियस्य अनुकृतिं लीलां
विदुः॥६८॥ यानेति॥ इष्टसंदर्शनादिना॥ यानं गतिः॥ स्थानं स्थितिः॥ आसनं उपवेशनं॥ मुखने
त्रादिकर्मणां विशेषः विलासः स्यात्॥६९॥ स्तोकेति॥ कांतिपोषकृत् स्तोका स्वल्पा॥ माल्यादिरचे
ना विच्छित्तिः॥ इष्टेपि वस्तुनी अतिगर्वेण अनादरः विब्बोकः॥७०॥ क्रोधेति॥ अभीष्टसंगजात्

शिव
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हर्षात् कृत्रिमक्रोधश्रमत्रासहासशुष्करोदनानां संकरं किलकिंचितं वदंति ॥७१॥ तद्भावेति ॥ त
स्मिन् प्रत्यो भावः अभिलाषः ॥ तेन भाविते वासिते चित्ते वल्लभस्य कथादिषु कर्णकंडूयनादिकं मो
ट्टायितमित्याहुः ॥७२॥ केशस्तनेति ॥ संभ्रमात् आदरात् हर्षे पि केशस्तनअधरादीनां ग्रहणे निषेध
सूचकं शिरःकरविधूननं कंपनं कुट्टमितं आहुः ॥७३॥ त्वरयेति ॥ दयितागमनादिषु रागहर्षादेः त्व
रया भूषणादीनां अस्थाने विन्यासः विभ्रमः ॥७४॥ सुकुमारेति ॥ सुकुमारतया अंगानां विन्यासः
ललितं विदुः ॥ सौभाग्यादिअवलेपजः अवलेपो गर्वः ॥ विकारः मदः ॥७५॥ वक्तव्येति ॥ वक्तव्य
कालेपि उत्तरदानसमयेपि अवचः मौनं विहृतं मतं ॥ प्रियविच्छेदे प्रियवियोगे स्मरावेगोत्थं चेष्टि
तं तपनं ॥७६॥ अज्ञानादिति ॥ दयितस्य पुरः मतीतस्यापि वस्तुनः नामादि संपृच्छ्य यत् अवस्थानं
तत् तत्त्ववेदिभिः मौग्ध्यं प्रोक्तं ॥७७॥ भूषणामिति ॥ भूषाणां अर्धरचना स्वल्पधारणं वृथा व्यर्थं विष्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० व्या०
८

कुसमंतातू अवेक्षागंदर्शनं॥इषत् रहस्यस्यदृयितस्यसमीपेआख्यानंविक्षेपः॥७८॥रम्येति॥र
म्यवस्तुसमालोकेलोलतातस्मिन्समस्तहृत्त्वंकुतूहलंस्यात्॥योवनोद्भूद्दसंभवः वृथाहासःहसि
तं॥७९॥कुतइति॥कुतोपिहेतोः दयितस्यअग्रेभयेनभीत्यासंभ्रमःचकितं॥कांतेनसहविहारे
क्रीडनंकेलिरित्युच्यते॥८०॥वनिर्येदृतिस्पष्टं॥८३॥स्तंभइत्यादिस्तंभःजडता॥स्वेदःप्रस्वेदः
रोमांचःरोमहर्षः॥स्वरभंगःकंठस्वरवैरूप्यं॥वेपथुःकंपः॥वैवर्ण्यविवर्णता॥अश्रु॥प्रलयःइं
द्रियाणांस्वविषयेअप्रवृत्तिःइतिअष्टौसात्विकाःमताः॥८४॥दशावस्थाआहप्रथमेति॥अभि
लाषःप्रथमावस्था॥प्रियस्यचिंतनंद्वितीयावस्था॥तस्यप्रियस्यसर्वकालंस्मरणं तत्स्मृतिःश्रो
का॥गुणकीर्तनंचतुर्थावस्था॥उद्वेगःमनसोअनवस्थितिःपंचमावस्था॥विलापःषष्ठास्था॥
उन्मादःअन्यथापूर्वव्यवहारप्रवृत्तिःसप्तमावस्था॥तथाअष्टमेव्याधिःशारीरपीडाव्याधिःअष्ट

शिव
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मावस्था॥नवमेजडताप्रोक्ता।जडतानवमावस्था॥मरणंदशमावस्था॥अथरीतीआह॥वृहत्समा
सागोडीस्या॥वृहत्समासोपस्यांसावृहत्समासा॥रौद्ररसे॥वीररसे॥हास्यरसे॥द्वित्रिपदयुक्तसमा
साद्वेवात्रीणिवापदानिद्वित्रिपदानिद्वित्रिपदैःयुज्यतेतादृक्समासोयस्यांसावैदर्भीरीतिःआख्या
ता॥शृंगार॥शांत॥करुण॥बीभत्स॥भयानकाद्भुतेयोज्या॥८८॥उत्साहेति॥उत्साहजःउत्साहस्था
यीभावकः॥वीरःभवेत्॥वीररसःत्रिधात्रिप्रकारकः॥धर्मायुद्धादानभेदात्॥श्लाघ्यैःसर्वगुणैःयु
क्तःतत्रवीररसेनायकःवर्ण्यते॥८९॥शोकजइति॥शोकजःशोकस्थायीकरुणःरसःज्ञेयःतत्रक
रुणेभूपातःपृथिव्यांपतनंरोदनं॥मोहःविचित्तिता।वैवर्ण्यमुखादिकांतिविपर्ययः॥निर्वेदःस्वाव
माननं॥प्रलापःअनर्थकवचनकथनं॥प्रलापोनर्थकंवचइत्यमरः॥तत्रअश्रूणिवर्णयेत्॥९०॥
हासइति॥हास्यजन्मारसःहास्यस्थायी॥हास्यनामारसःबुधैःसमाख्यातः॥चेष्टांगवेषवैकृत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० आ० ९

नूहास्यस्यसंभवःवाच्यः॥९१॥ विस्मयइति॥ विस्मयोस्यःअद्भुतःज्ञेयः॥ विस्मयस्थायीभावः॥
सच्चअसंभाव्यवस्तुनांदर्शनानुश्रवणातूदेहिनांउपजायते॥९२॥ नेत्रेति॥ नेत्रप्रकाशः॥ पुलकः रो
मांचः॥ स्वेदः प्रस्वेदः॥ निष्पंदनेत्राता नेत्रव्यापाररहित्यं॥ इति एते अद्भुतस्य अनुभावाः गद्गदावा
णी च॥९३॥ घोरेति॥ भयानकवस्तुदर्शनेन भीतिजन्माभयस्थायीभावः भयानकः॥ अमुंभया
नकंबुधाः॥ वनितानीचःहीनजातिः॥ बालेषु वर्णयंति॥९४॥ दिग्दर्शनेति॥ दिग्दर्शनं दिशांदर्शनं
॥ आस्यशोषंमुखशोषः॥ गद्गदगीः॥ संभ्रमः॥ कंपः॥ त्रासः॥ वैवर्ण्यसंमोहः॥ अत्रअद्भुते वर्ण्यते॥
॥९५॥ रौद्रेति॥ क्रोधस्थायीभावः रौद्रः ज्ञेयः॥ शत्रुकृतपराजयानुकोपोज्ञेयः॥ भीष्मांभयानकाक्रिया
यस्य एतादृशः उग्रः सामर्षःसक्रोधः तत्रनायकः भवेतू॥९६॥ भुजाघातेति॥ भुजाघातः एकस्मिनूसं
कुचितेकूर्परेअपरेणन्युब्जेनकरतलेनताडनं॥ स्वप्रशंसास्ववस्तुतिकथनं॥ शस्त्रोक्षेपः शस्त्राणां

द्वि व ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्दृथाइतस्तथापरिभ्रामणं॥भ्रूकुटिः॥भ्रुवःकुटिःकौटिल्यं॥ग्रात्रोःआक्षेपःअपकारःदलनंचक
वीश्वराःवर्णयंति॥९७॥जुगुप्सेति॥जुगुप्सास्थायीभावःवीभत्सःभवेत्॥अहृद्यश्रुतीक्षणैःअ
हृद्यस्यअप्रियस्यश्रुतिःश्रवणंइक्षणंदर्शनं॥तैःस्यात्॥अत्रनीष्टीवनाऽऽस्यमंगादिमहतांश्रेष्ठा
नांनवर्ण्यतें॥९८॥सम्यक्ज्ञानेति॥सम्यक्ज्ञानात्॥समुद्भवोयस्यसःसम्यक्ज्ञानसमुद्भूतः॥
हीनजातीयानांतुवर्ण्यनएव॥निस्पृहनायकःशांतः॥रागद्वेषपरित्यागात्सम्यक्ज्ञानसमुद्भवः
भवति॥९९॥स्निग्धेति॥स्निग्धास्नेहविशिष्टा॥हृष्टाहर्षवति॥दीनादैन्यवती॥क्रुद्धाक्रोधवतीदृप्ता
दर्पविशिष्टा॥भयान्विताभयविशिष्टा॥जुगुप्सिता॥विस्मिताविस्मयसहिताशांतादृतिरसदृष्टयः
॥१००॥जगदिति॥यद्यपिजगतिपरःशताःपावस्करादिलात्साधकःगुरुतमारचनाबुधबुद्धयेसं
ति॥ननुतथापिअगुरुतमास्वल्पारचनाअबुधबुद्धयेबालबोधायमयावृथानकृताविस्तारका

19

र०व्या०
१०

ठिन्याभावसूचनायपदद्वयमितिनपूर्वापरविरोधः॥२०१॥गुरुपादेत्ति॥त्रिपाठीशिउपनामकः
शिवरामसंज्ञकः॥अमुंरसरत्नहाराख्यंपूरितवान्॥२०२॥

शिव
१०

KKSU LIBRARY RAMTEK 441 106 M-1874 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.10.20 14:05
,TRANSFERRED=2020/10/20 at 14:10:15
,PAGES=20
,TYPE=STD
,NAME=S0004223
,Book Name=M-1874-RASRATAN HAR VYAKHYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection